प्रवेश सं० १९८९४

विषय: धर्मशास्त्रम

क्रम सं०

नाम एकादशीनिर्णयः

ग्रन्थकार विठ्ठलदीक्षितः

13810

पत्र सं० १-५

अक्षर सं० (पंक्तौ) ३८

पंक्ति सं० (पृष्ठे) ९

श्लोक सं०

लिपि: दे० ना०

आधार: का०

आकार: १२·५ × ५

वि० विवरणम् सं०

अ० ३८४० न.

पी० एस० यू० पी०--११ एस० सी० ई०--१९५१--५० ००० 

Indira Gandhi National
Centre for the Arts

९५९

Indira Gandhi National
Centre for the Arts

श्रीकृष्णायनमः अथैकादशीनिर्णयः तत्रवैष्णवानामेकादशीकीदृश्युपोष्येतिविचार्यते स्मार्त्तानि
र्णयस्तुमाधवाचार्यादिभिर्विस्तरेणकृतएवास्तीतिसोत्रनोच्यते तत्रैकादशीव्रतस्यनित्यसदाद्विशष्टैःफ
लश्रवणाच्चनित्यत्वंकाम्यत्वंचसिद्धं तथाहिगरुडपुराणे उपोष्यैकादशीनित्यंपक्षयोरुभयोरपि सन
त्कुमारोपि एकादशीसदोपोष्यापक्षयोःशुक्लकृष्णयोः विष्णुरहस्येपि एकादशीनभोक्तव्यायावदा
युःसुवृत्तिभिः इति कण्वोपि एकादशीमुपवसेन्नकदाचिदतिक्रमेदिति एकादश्यांनभुंजीतकदाचि
दपिमानवइति तथा परमापदमापन्नेहर्षेवासमुपस्थिते सूतकेमृतकेवापिनत्याज्यंद्वादशीव्रतं
मिति एकादश्यांश्राद्धंकृत्वापिनभोक्तव्यं तथाहकात्यायनः उपवासोयदानित्यःश्राद्धंनैमित्तिकंभ
वेत् उपवासंतदाकुर्यादाघ्रायपितृसेवितमिति अकरणेप्रत्यवायोपिसनत्कुमारेणदर्शितः नक
रोतिहियोमूढएकादश्यामुपोषणं सनरोनरकंयातिरौरवंतमसावृतमिति मद्यपानान्मुनिश्रेष्ठपाते १

वनरकंव्रजेत् एकादश्यन्नकामास्तुपितृभिःसहमज्जतीति नारदीयेपि यानिकानिचपापानिब्रह्महत्
त्यासमानिच अन्नमाश्रित्यतिष्ठंतिसंप्राप्तेहरिवासरे कूर्मपुराणेपि वदंतीहपुराणानिभूयोभूयोवरानने
नभोक्तव्यंनभोक्तव्यंसंप्राप्तेहरिवासरे संक्रान्त्यादिषूपवासनिषेधःसंक्रान्त्यादिनिमित्तकोनैकादशीनिमि
त्तकः तदुक्तंजैमिनिना तन्निमित्तोपवासस्यनिषेधोयमुदाहृतः नानुषंगकृतोत्राहोयतोनित्यमुपो
षणमिति अयमर्थः एकादश्युपवासस्यनित्यत्वात्संक्रान्त्युपवासस्यचकाम्यत्वात्काम्योपवासनि
षेधेननित्योपवासनिषेधःसिध्यतीति उपवासस्वरूपंविष्णुधर्मोत्तरेनिरूपितं नानुवृत्तस्यपापेभ्यो
यस्तुवासोगुणैःसह उपवासःसविज्ञेयःसर्वभोगविवर्जितइति इत्यादीनिनित्यत्वविधायकानि वि
ष्णुरहस्येपि यदिच्छेद्विष्णुसायुज्यंश्रुतान्संपदमात्मनः एकादश्यांनभुंजीतपक्षयोरुभयोरपि कात्याय
नः संसारसागरोत्तारमिच्छन्विष्णुपरायणः ऐश्वर्यसंततिस्वर्गंमुक्तिंवायदिच्छसि एकादश्यांनभुंजी

Indira Gandhi National
Centre for the Arts

तपक्षयोरपि स्कंदपुराणे यदीच्छेद्विपुलान्भोगान्मुक्तिंवात्यंतदुर्लभां एकादश्यामुपवसेत्पक्षयोरु
भयोरपि इत्यादीनि काम्यत्वबोधकानि नित्यत्वेनोपवासे केवलमेकादश्यां सायंप्रातश्च भोजनं वर्जये
त् दशमीद्वादश्योर्नैकभुक्तनियमः तदुक्तं कात्यायनेन नित्योपवासी यो मर्त्यः सायंप्रातर्भुजिक्रियां
संत्यजेन्मतिमान् विप्रः संप्राप्ते हरिवासरे इति विप्रइतिसर्ववर्णोपलक्षणं काम्योपवासे तु दशम्यां द्वा
दश्यां चैकभुक्तं कार्यमेकादश्यां तूपवासः कार्यः तदुक्तं देवलेन सायमाद्यंतयोरह्नोः सायंप्रातश्च म
ध्यमे उपवासफलप्रेप्सुर्जह्याद्भुक्तचतुष्टयमिति अत्र फलप्रेप्सुरित्यनेनैवास्य कामविषयत्वं ज्ञायते उ
पवासांगतिथिनिर्णयस्य वेधाधीनत्वादेकादश्यां दशमीवेधो निरूप्यते स च माधवीये द्विविध उक्तः
तत्रारुणोदयवेधवचनानि भविष्यत्पुराणे अरुणोदयकाले तु दशमी यदि दृश्यते सा विद्धैकादशी
तत्र पापमूलमुपोषणं अरुणोदयवेलायां दशागंधो भवेद्यदि दुष्टं तत्तु प्रयत्नेन वर्जनीयं नराधिप ग २

रुडपुराणे दशमीशेषसंयुक्तो यदि स्यादरुणोदयः नैवोपोष्यं वैष्णवेन तद्दिने एकादशीव्रतं अरुणो
दयस्य प्रमाणं स्कंदनारदाभ्यामुक्तं उदयात्प्राक् चतस्रस्तु नाडिका अरुणोदय इति तत्र वेधातिवेधमहा
वेधाः अरुणोदयमध्य एव योगस्तु सूर्योदयवेधः स्मार्तविषयत्वेन व्यवस्थापितः अत्र कलाकाष्ठादिवे
धो गृह्यते नात्र तिथ्यंतरवत् त्रिमुहूर्तत्ववेधेऽपेक्षितं तदुक्तं नारदीये मलवेधेऽपि विप्रेन्द्र दशम्यैकादशी
त्यजेत् सुरायाबिंदुना स्पृष्टं गंगांभ इव निर्मलमिति कलाकाष्ठादिकाप्येव दृश्यते दशमी विभो एकादश्यां
न कर्तव्यं तत्र राजन्कदाचनेति स्मृत्यंतरेपि कलार्द्धेनापि विद्धा स्याद्दशम्यैकादशी यदि तदाप्येकाद
शीं त्यक्त्वा द्वादशीं समुपोषयेत् सोयं कलाकाष्ठादिवेधोऽरुणोदये सूर्योदये च समानः वैष्णवी दीक्षां प्रा
प्तो वैष्णवः परमापदमापन्नो हर्षे वा समुपस्थिते नैकादशीं त्यजेद्यस्तु यस्य दीक्षास्ति वैष्णवी समात्मा
सर्वजीवेषु निजाचारादविच्युतः विष्ण्वर्पिताखिलाचारः स हि वैष्णव उच्यते इति वाक्यात् सामान्यवि

Indira Gandhi National
Centre for the Arts

शेषाभ्यां प्रतिसिद्धत्वाद् अरुणोदयविद्धैकादशी वैष्णवेन परित्याज्या अस्य योगसंज्ञकश्चतुर्थः सू
र्योदयो वेधस्तस्य त्याज्यत्वमर्थात्सिद्धं वचनेभ्योपि अरुणोदयवेधो यदा त्यज्यते तत्र किं वक्तव्यं
सूर्योदयवेध इति विष्णुधर्मोत्तरे दशमीवेधश्चतुर्विधो निरूपितः पंचचत्वारिंशता स्पर्शः संगः पं
चाशता मतः पंचपंचाशता शल्यं वेधः षट्पंचाशता मतः स्पर्शादिचतुरो वेधान् वर्जयेत् वैष्णवो नरः
तथा च स्मृत्यंतरेपि अर्द्धरात्रात्परा यत्र एकादश्युपलभ्यते तत्रोपवासः कर्त्तव्यो न तु वै दशमीकला
युगभेदेन व्यवस्थापि विष्णुधर्मोत्तर एवोक्ता स्पर्शादिचतुरो वेधाः सुप्रसिद्धाः कृते हि वै संगादयस्त्रे
तायां शल्याद्यौ द्वापरे कलौ स्पर्शादिचतुरो वेधाः कृतयुगे ग्राह्यत्वेन सुतरां प्रकर्षेण सिद्धाः तथा संगाद
यो वेधाः त्रेतायुगे ग्राह्यत्वेन सिद्धाः तथा शल्यमाद्यं वयोस्तो शल्याद्यौ शल्यवेधौ द्वापरे कलियुगे च प्र
कर्षेण ग्राह्यत्वेन सिद्धौ अनयोरेवं समयान्तमि युगे शल्यवेध एवादरणीयः अत एव माधवाचा ३

र्यैरुक्तं अरुणोदयात्पूर्वापि दशमीकला यदि विद्यते तदा नोपवासः स्तदभावे तूपवासः कर्त्तव्य इति
अत एवोक्तं श्रीभागवततत्त्वार्थदीपे पूर्वमन्यथा करणे विभगवन्मार्गश्च वेशानंतरं पंच पंचाशद्घ
टिका दशमी चेत्तदैकादशी त्याज्येति या तु वेधरहिता शुद्धैकादशी सा द्विविधा आधिक्येन युक्ता त
द्रहिता च आधिक्यं च त्रिविधं एकादश्याधिक्यं द्वादश्याधिक्यमुभयाधिक्यं च त्रिष्वप्येतेषु शुद्धामप्ये
कादशीं परित्यज्य परेद्युरुपवासः कर्त्तव्यः तत्रैकादश्याधिक्ये नारद आह संपूर्णैकादशी यत्र द्वाद
शी वृद्धिगामिनी द्वादश्यां लंघनं कार्यं त्रयोदश्यां तु पारणमिति स्मृत्यंतरेपि एकादशी यदा पूर्णा प
रतः पुनरेव सा पुण्यं क्रतुशतस्योक्तं त्रयोदश्यां तु पारणमिति विष्णुरहस्ये एकादशीकलां प्राप्य
न द्वादश्युपोषिता तुल्यं क्रतुशतेनास्यास्त्रयोदश्यां तु पारणमिति द्वादश्याधिक्ये व्यास आह एकादशी
यदा शुद्धा परतो द्वादशी भवेत् उपोष्या द्वादशी तत्र यदीच्छेत्परमां गतिमिति उभयाधिक्येन भृगुराह

Indira Gandhi National
Centre for the Arts

संपूर्णैकादशीयत्रप्रजातेपुनरेवसा सर्वैरेवोत्तराकार्यापरतोद्वादशीयदीति नारदीयपुराणे ९
कादशीनवेत्संपूर्णापरतोद्वादशीयदि एकादशींपरित्यज्यद्वादशींसमुपोषयेत् इति द्वादश्यांपारणं
द्वादशीप्रथमपादंत्यक्त्वाकर्तव्यं तदुक्तं द्वादश्याःप्रथमःपादोहरिवासरसंज्ञकः तमतिक्रम्यकुर्वी
तपारणंविष्णुतत्परः शयनीबोधनीमध्येयाकृष्णैकादशीभवेत् सैवोपोष्यागृहस्थेननान्याकृष्णाक
दाचन शुक्लामेवसदागृहीत्यादिनिषेधेफलाहारादिकंकार्यं उपवासोनिषिद्धेतुनक्तंकिंचित्प्रकल्प
येत् नउपवासस्तुउपवासफलंलभेत् नक्तंहविष्यान्नमनोदनंवाफलंतिलाःक्षीरमथांबुचा
ज्यं यत्पंचगव्यंयदिवापिवायुःप्रशस्तमत्रोत्तरमुत्तरंचेतिवायुपुराणोक्तत्वात् अत्रतन्मलाच्च अश
क्तावप्येतदेवकार्यं पंचपंचाशद्घटिकादशमीमध्येपलमात्रन्यूनमपिनैकादशीत्याज्यावेधाभावात्
एवंवैष्णवानामेकादशीनिर्णीता इत्येकादशीनिर्णयःसंपूर्णः श्रीविठ्ठलदीक्षितकृतं शुभ ५

मस्तु ब्रह्मांडपुराणे श्रीभगवद्वाक्यं विवादेषुचसर्वेषांद्वादश्यांसमुपोषणं पारणंतुत्रयोदश्यामात्ते
यंमामकीमुने १बहुवाक्यविरोधेनसंदेहोजायतेयदा उपोष्याद्वादशीतत्रत्रयोदश्यांतुपारणं २स्त
येवाप्यथवाहृद्यौदशम्यादिदिनत्रये उपोष्याद्वादशीतत्रत्रयोदश्यांतुपारणं ३ नवमीपलमेकंस्या
द्दशमीचक्षयंगता पलवेधेपिविप्रेंद्रदशम्यैकादशींत्यजेत् ४ शुभंभूयात् कल्याणमस्तु श्रीर
स्तु श्रीगोकुलेशोजयति ॥

Indira Gandhi National
Centre for the Arts

Indira Gandhi National
Centre for the Arts